# द्वादशः पाठः

राजस्थानप्रदेशस्य पश्चिमाञ्चले प्रसृतास्ति थारमरुभूमिः। राजस्थानीयाः वयं विशेषतः अस्य मरुदेशस्य शोभासम्पदः अक्षयकोषं प्रति अनुरक्ताः गौरवान्विताः च स्मः। न केवलं वयमपितु मरुमहिम्ना आकृष्टाः देशाटनरुचयः वैदेशिकाः अपि मरुसौन्दर्य-दर्शन-वञ्चितान् स्वात्मनः लोचनैर्वञ्चितान् मन्यमानाः मरुदर्शनं कृत्वा आत्मनः धन्यान् मन्यन्ते। राजस्थानी-भाषायाः महाकविः स्वनामधन्यः पद्मश्रीः कन्हैयालालः सेठिया इमामेव भूमिं स्तुवन् 'धरती धोराँ री' इत्यमरं गीतं रचितवान्। आधुनिकाः संस्कृत-कवयोऽपि स्वकाव्येषु मरुभूमि-गौरवगानं कृतवन्तः। प्रस्तुते पाठे कतिपयैः सरलैः श्लोकैः मरुभूमेः अपूर्वसौन्दर्यस्य यथावच्च चित्ताकर्षकं च चारुचित्रं प्रस्तूयते।

## मरुसौन्दर्यम्

**शरीर - विज्ञान - विचक्षणेन प्रशंसितोऽयं चरकेश्वरेण।**
**स्नेहार्द्र-भावैकरसैर्विशिष्टः शुष्कोऽपि नित्यं सरसः स देशः ।। १ ।।**

**मरुः सुवर्णो न हि येन दृष्टः किं तेन दृष्टं कुहचित् सुदृश्यम्।**
**स्फुटं मरौ भान्ति सुमेरुशृङ्गाः शिलासु कृष्णासु न ते हि मृग्याः ।। २ ।।**

**रम्ये क्वचित् सैकत-वप्र-सानौ सुकोमले भास्वति हैमवर्णे।**
**प्रातः प्रदोषे च सुखं स्थितानां केषां न चेतांसि विकासवन्ति ।। ३ ।।**

**स शीतलो गन्धवहः समीरः स तित्तिराणां मधुरो विरावः।**
**तन्नर्तनं बर्हविभूषणानां समुत्प्लुतिः सा च कुरङ्गमाणाम् ।। ४ ।।**

**ते तुन्दिलाः स्वादुरसाः कलिङ्गाः सा शारदी चञ्चलचन्द्रिका च।**
**स्फूर्तिः स्फुरन्ती स्फुरगावलीषु क्रमेलकानां गतयश्च तास्ताः ।। ५ ।।**

**वर्षागमे चारुमरुं विहाय क्वान्यत्र कस्यापि रमेत चित्तम्।**
**सरःसु वर्षासमयेऽपि यस्मिन् शरत्-प्रसन्नं सलिलं चकास्ति ।। ६ ।।**

**गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदानयज्ञैः।**
**किं नाम तद्यन्न मरौ समृद्धं विद्या-समृद्धो भवता विधेयः ।। ७ ।।**

-पं. विद्याधरः शास्त्री

**मानं मनीषिता मैत्री मरुदुष्णं मरीचिका।**
**मृगाः मूर्ध्नि मनुष्याणाम् उष्णीषं प्रमुखम्मरौ ।।८ ।।**

–अज्ञातमूलं सम्पादितञ्च

## अन्वयः

१. शरीरविज्ञानविचक्षणेन चरकेश्वरेण प्रशंसितः सः अयं देशः शुष्कः अपि (सन्) स्नेहार्द्रभावैकरसैः विशिष्टः (अतः) नित्यं सरसः (अस्ति)।

२. सुवर्णः मरुः येन न हि दृष्टः तेन कुहचित् सुदृश्यं किं दृष्टम्? (ये) सुमेरुशृङ्गाः मरौ स्फुटं भान्ति, कृष्णासु शिलासु ते नहि मृग्याः।

३. क्वचित् रम्ये सुकोमले भास्वति हैमवर्णे सैकतवप्रसानौ प्रातः प्रदोषे च सुखं स्थितानां केषां चेतांसि विकासवन्ति न?

४. स शीतलः गन्धवहः (च) समीरः, तित्तिराणां स मधुरः विरावः, बर्हविभूषणानां तत् नर्तनम्, सा च कुरङ्गमाणां समुत्प्लुतिः।

५. ते तुन्दिलाः स्वादुरसा कलिङ्गाः, सा च शारदी चञ्चल-चन्द्रिका, स्फुरगावलीषु स्फुरन्ती (सा) स्फूर्तिः, क्रमेलकानां च ताः ताः गतयः।

६. वर्षागमे चारुमरुं विहाय अन्यत्र क्व कस्यापि चित्तम् रमेत? यस्मिन (मरौ) वर्षासमयेऽपि सरःसु शरत्प्रसन्नं सलिलं चकास्ति।

७. (मरौ) गावः प्रसन्नाः, मनुजाः प्रसन्नाः व्रतदानयज्ञैः च देवाः प्रसन्नाः। किं नाम तत् यत् मरौ न समृद्धम्? (सोऽयं मरुः) भवता विद्यासमृद्धो विधेयः।

८. मानं, मनीषिता, मैत्री, उष्णं मरुत्, मरीचिका, मृगाः, मनुष्याणां मूर्ध्नि उष्णीषम्— (इत्येतत्सर्वं) मरौ प्रमुखम्।

## शब्दार्थाः

**शरीरविज्ञान-विचक्षणेन** — शरीरविज्ञानस्य=चिकित्साशास्त्रस्य विचक्षणेन=विशेषज्ञेन, चिकित्सकेन वैद्येन वा इत्यर्थः। **चरकेश्वरेण**— आचार्य-चरकेण। **स्नेहार्द्रभावैकरसैः विशिष्टः** — स्नेहेन आर्द्रःभावः स्नेहार्द्रभावः, केवलं तद्रसैः विशिष्टः=युक्तः। अत्र अर्थद्वयम् — १. घृतादि की चिकनाई के एकमात्र रसों से २. प्रेम और दयादि भावों की एकमात्र मधुरताओं से। **शुष्कः अपि**- रूक्षः अपि। **सरसः** - रसेन सहितः रसयुक्तः। अत्रापि अर्थद्वयम् — १. स्वादिष्ठम् २. आनन्दमयः। **सुवर्णः** — सुन्दरः, सुन्दरवर्णयुक्तः, स्वर्णरूपः (सुरंगा-रंगीला)। **मरुः** — मरुप्रदेशः, सुमेरुपर्वतः **दृष्टः** — अवलोकितः। **कुहचित्** — कुत्रचित् (कहीं पर)। **सुदृश्यम्** — दर्शनीयम्। **मरौ** — मरुदेशे। **स्फुटम्** — स्पष्टम्। **भान्ति** — शोभन्ते। **सुमेरुशृङ्गाः** — सुमेरुपर्वतस्य शिखराणि। **कृष्णासु** — श्यामासु। **मृग्याः** — अन्वेषणीयाः। **क्वचित्** — कुत्रचित्। **रम्ये** — रमणीये। **सुकोमले** — मृदौ। **भास्वति** — द्युतिमाने,

ज्योतिर्मये। **हैमवर्णे** — स्वर्णिमे। **सैकतवप्र-सानौ**— सैकतवप्रः=बालुकास्तूपः, बालुका-पर्वतः वा तस्य सानौ=शिखरे (मिट्टी के टीलों या धोरों की चोटी पर)। **प्रदोषे** — निशीथकाले, रात्रौ। **सुखम्** — सुखपूर्वकम्, सानन्दम्। **स्थितानाम्** — उपविष्टाणाम्। **केषाम्** — केषां जनानाम्। **चेतांसि** — मनांसि। **विकासवन्ति** — विकसितानि, प्रफुल्लानि। **गन्धवहः** — गन्धं=सौरभं वहति इति। **समीरः** — वायुः। **तित्तिराणाम्** — पक्षिविशेषाणाम्, 'तीतर' इत्याख्यानाम्। तीतरों का। तित्ति इति शब्दं करोति इति तित्तिरः। **विरावः** — कूजनम्, कूजितम्, ध्वनिः। **बर्हविभूषणानाम्** —बर्हः=पुच्छः एव विभूषणं येषां ते मयूराः, तेषाम्। मोरों का। **नर्तनम्** — नृत्यम्। **कुरङ्गमाणाम्** — कुरङ्गमः=हरिणः, तेषाम्। हरिणों की। **तुन्दिलाः** — स्थूलाः। मोटे। **स्वादुरसाः** — सुमधुराः। **कलिङ्गाः** — कलिङ्गः इति देशविशेषः। किन्तु अत्र फल-विशेषः। मतीरे। **शारदी** — शरत्कालीना। **चञ्चल-चन्द्रिका**- चञ्चला चन्द्रज्योत्स्ना। **स्फुरगावलीषु** — खगपङ्क्तिषु। **स्फुरन्ती** — स्पन्दमाना-फड़कती हुई, दमकती हुई। **स्फूर्तिः** — स्फुरणम्। **क्रमेलकानाम्** — उष्ट्राणाम्। **गतयः** — गमनप्रकाराः, चाल इति। **वर्षागमे** — वृष्टिकाले। **चारु-मरुम्** — सुन्दरं मरुदेशम्। **विहाय** — त्यक्त्वा। **क्व** — कुत्र। **चित्तम्** — मनः। **रमेत** — रमणं कुर्यात्। **सरःसु** — सरोवरेषु, तडागेषु। **शरत्प्रसन्नम्** — शरदृतौ इव प्रसन्नं=स्वच्छं, निर्मलम्। शरद् ऋतु के समान साफ। **सलिलम्** — जलम्, पयः। **चकास्ति** — शोभते। **गावः** — धेनवः। **प्रसन्नाः** — तुष्टाः। **मनुजाः** — मानवाः। **व्रतदानयज्ञैः** — व्रतेन दानेन यज्ञेन च। **विद्यासमृद्धो** — विद्यया समृद्धः=सम्पन्नः। **विधेयः** — विधातव्यः, सम्पादनीयः, करणीयः। **मानम्** — सम्मानः, आदरः। **मनीषिता** — विद्वत्ता, विचारशीलता। **मैत्री** — मित्रता। **मरुत्** — वायुः। **मरीचिका** — मृगतृष्णा, मृगमरीचिका। **मूर्ध्नि** — शिरसि, मस्तके। **उष्णीषम्** — शिरोवेष्टनम्, शिरस्त्राणम्, पगड़ी इति।

## अभ्यासः

**वस्तुनिष्ठ-प्रश्नाः**

१. पाठेऽस्मिन् 'शरीर विज्ञान-विचक्षणः' इति विशेषणं कस्य कृते प्रयुक्तम् —

(अ) आचार्य-चरकस्य (आ) आचार्य-चार्वाकस्य

(इ) आचार्य-सुश्रुतस्य (ई) आचार्य वाग्भटस्य ( )

२. 'मरुः सुवर्णो नहि येन दृष्टः'- इत्यस्य अर्थोऽस्ति —

(अ) मरुभूमौ येन स्वर्णम् (काञ्चनम्) न दृष्टम्।

(आ) मरुभूमौ सुन्दरः वर्णः (रङ्ग) येन न दृष्टः।

(इ) स्वर्णस्य मरुप्रदेशः येन न दृष्टः

(ई) सुवर्णः (सुरङ्ग) स्वर्णरूपः वा मरुदेशः येन न दृष्टः। ( )

३. 'सैकतवप्रसानुः' इत्यस्य कृते प्रयुक्तं विशेषणमस्ति —

(अ) रम्यः (आ) सुकोमलः

(इ) हैमवर्णः (ई) उपर्युक्तानि सर्वाणि अपि( )

४. मरोः सौन्दर्यम् वर्धते विशेषतः —

(अ) वसन्तर्तौ (आ) शीतर्तौ

(इ) ग्रीष्मर्तौ (ई) वर्षर्तौ ( )

५. मरुदेशे के प्रसन्नाः सन्ति —

(अ) गावः (आ) मनुजाः

(इ) देवाः (ई) एते सर्वेऽपि ( )

६. 'मानं मनीषिता' इत्यादिपद्यानुसारं कियन्ति वस्तूनि मरुदेशे मुख्यानि प्रतिपादितानि —

(अ) पञ्च (आ) सप्त

(इ) अष्टौ (ई) नव ( )

**लघूत्तरात्मक-प्रश्नाः**

१. अधोलिखित- प्रश्नानाम् उत्तराणि लिखन्तु —

(क) चरकाचार्येण मरुभूमेः का विशेषता प्रकटिता?

(ख) मरुदेशे सैकतवप्राः (बालुका-स्तूपाः) कीदृशाः सन्ति?

(ग) वर्षागमे मरोः शोभा कीदृशी भवति?

(घ) मरुमरीचिकां स्पष्टीकुर्वन्तु।

२. 'क'-खण्डं 'ख'-खण्डेन यथोचितं योजयतु —

| **क** | **ख** |
|---|---|
| १. चरकः | विरावः |
| २. बर्हविभूषणाः | उष्णीषम् |
| ३. गन्धवहः | तुन्दिलाः |
| ४. मूर्धा | समुत्प्लुतिः |
| ५. तित्तिराः | नर्तनम् |
| ६. कलिङ्गाः | शरीर-विज्ञानम् |
| ७. कुरङ्गमाः | समीरः |

३. अधोलिखित-पदानां पर्यायपदानि पाठाद् अन्विष्य लिख्यन्ताम् —

| | |
|---|---|
| १. विशेषज्ञः | विचक्षणः |
| २. रूक्षः | ............... |
| ३. वायुः | ............... |
| ४. उष्ट्रः | ............... |
| ५. शिरस्त्राणम् | ............... |
| ६. हरिणः | ............... |
| ७. मयूरः | ............... |

८. निशाकाल:/निशारम्भ: ...............

४. अधस्तनपदानां विलोमपदानि पाठात् चित्वा लिखन्तु —

१. शुष्क: सरस:
२. निन्दित: ...............
३. उष्ण: ...............
४. खिन्न: ...............
५. दरिद्र: ...............
६. अपमानम्, अपमान: ..............
७. कृश: ..............
८. कठोर: ..............

५. अधस्तन-पदानि आधृत्य (उदाहरणं च अनुसृत्य) संस्कृतेन वाक्य-निर्माणं कुर्वन्तु —

१. अयम् अयं भारतदेश: विश्वगुरु: इति कथ्यते।
२. विहाय ...............................................
३. प्रात: ...............................................
४. प्रदोषे ...............................................
५. मैत्री ...............................................

६. स्थूलाक्षरपदमाश्रित्य संस्कृतेन प्रश्नवाक्य-निर्माणं क्रियताम् —

१. **अयं** देश: शुष्क: अपि सरस:। क: देश: शुष्क: अपि सरस: ?
२. मरौ **तुन्दिला:** कलिङ्गा: भवन्ति। ....................................
३. **प्रदोषे** चेतांसि विकसन्ति। ....................................
४. **सुमेरुश्रृङ्गा:** मरौ भान्ति। ....................................
५. **तित्तिराणां** विराव: मधुर:। ....................................
६. **मरुदेश:** चरकेश्वरेण प्रशंसित:। ....................................

**निबन्धात्मक-प्रश्ना:**

१. मरुभूमे: सौन्दर्यम् अवलम्ब्य दश संस्कृत-वाक्यानि लिखन्तु।
२. मरुदेशस्य वर्षाकालिकं माहात्म्यं वर्णयन्तु।
३. 'रम्ये क्वचित्.....विकासवन्ति'-इत्यस्य पद्यस्य हिन्द्यनुवादो विधेय:।
४. 'स: शीतलो......कुरङ्गमाणाम्'-इत्यस्य पद्यस्य संस्कृत-व्याख्या विधेया।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्ना:**

१. (अ) २. (ई) ३. (ई) ४. (ई) ५. (ई) ६. (आ)

**व्याकरण-प्रश्नाः**

१. सन्धिविच्छेदं/सन्धिं वा कुर्वन्तु —

| | |
|---|---|
| १. प्रशंसितोऽयम् | ......................+................. |
| २. शुष्कः+अपि | .......................................... |
| ३. तत्+नर्तनम् | .......................................... |
| ४. तास्ताः | ......................+................. |
| ५. क्वान्यत्र | ......................+................. |
| ६. कस्य+अपि | .......................................... |
| ७. समये+अपि | .......................................... |
| ८. यन्न | ......................+................. |
| ९. चरक+ईश्वरः | .......................................... |
| १०. गतयश्च | ......................+................. |

२. अधोलिखितेषु पदेषु प्रकृतिप्रत्यय-विभागं कुर्वन्तु —

| **पदम्** | **उपसर्गः + धातुः + प्रत्ययः** |
|---|---|
| १. विशिष्टः | वि + शिश् + क्त |
| २. प्रशंसितः | ....................................................... |
| ३. दृष्टः | ....................................................... |
| ४. सुदृश्यम् | ....................................................... |
| ५. नर्तनम् | ....................................................... |
| ६. समुत्प्लुतिः | ....................................................... |
| ७. स्फुरन्ती | ....................................................... |
| ८. गतिः | ....................................................... |
| ९. विहाय | ....................................................... |
| १०. प्रसन्नम् | ....................................................... |
| ११. मनीषिता | ....................................................... |

३. निम्नलिखितेषु पदेषु समासः करणीयः —

| | |
|---|---|
| १. शरीरस्य विज्ञानम् | शरीरविज्ञानम् |
| २. सुमेरोः शृङ्गाः | .................. |
| ३. मयूराणां नर्तनम् | .................. |
| ४. विद्यया समृद्धः | .................. |
| ५ सैकतस्य वप्रः | .................. |

४. अधोलिखितानां समस्तपदानां विग्रहं कुर्वन्तु–

| | |
|---|---|
| १. कृष्णशिलासु | कृष्णासु शिलासु |
| २. स्नेहार्द्रः | .................. |
| ३. मधुरविरावः | .................. |
| ४. क्रमेलकगतिः | .................. |
| ५. विद्यासमृद्धः | .................. |
| ६. चञ्चलचन्द्रिका | .................. |

५. वाच्य-परिवर्तनं (कर्तृवाच्याद् कर्मवाच्यम्, कर्मवाच्याद् वा कर्तृवाच्यम्) कुर्वन्तु —

| | |
|---|---|
| १. अयं चरकेण प्रशंसितः। | चरकः इमं प्रशंसितवान्। |
| २. येन मरुः न दृष्टः। | ............................. |
| ३. सः किम् अपश्यत्? | ............................. |
| ४. तित्तिरैः मधुरः विरावः क्रियते। | .............................. |
| ५. देवाः प्रसन्नाः भवन्ति। | .............................. |